सुतो मित्रमन्त्रिभिः परिवारितः। जगाम हिमवत्-पार्श्वे महादेवाभिशापतः। योऽसौ प्रविशते भूमौ स स्त्री भवति निश्चितम्। स राजा मृगसङ्गेन प्रविशत्तद्भावने। एकाकी तुरगोपेतः क्षणात् स्त्रीत्वं जगाम ह। सा बभ्राम वने शून्ये पीनोन्नतपयोधरा। का त्वं कस्य कुतः प्राप्ता चतुरोधोऽस्ति कश्चन। तां दृष्ट्वा बुधस्तन्वीं रूपौदार्य्यगुणान्विताम्। अष्टम्यां बुधवारेण तस्यां तुष्टो बुधो ग्रहः। ददौ स्वहाश्रमन्तस्या-मानीयत प्रतोषिताम्। पुत्रमुत्पादयामास योऽसौ ख्यातः पुरूरवाः। चन्द्रवंशकरो राजा आद्यः सर्वमहीक्षिताम्। ततः प्रभृति पूज्येयमष्टमी बुधसंयुता”। सा च सम्पूर्णा ग्राह्या न भिन्ना यथोक्तं तत्रैव “बुधाष्टमी शुभा पूर्णा यथोक्तफलदायिनी” तस्य व्रतमष्टवर्षं कार्य्यं तत्र भक्ष्यभेदादिकं च तत्रैवोक्तं यथा

“अष्टस्वष्टविधानेन विचित्रान्नैः पृथक् पृथक्। प्रथमा मोदकैर्भक्ष्यैः द्वितीया धानकैस्तथा। तृतीया घृतपूरैश्च चतुर्थी वटकैर्नृप!। पञ्चमी शुभ्रकासारैः षष्ठी सोहालकैः शुभैः। अशोकवर्त्तिभिः शुभ्रैः सप्तमीं चातिवाहयेत्। अष्टमी फाणितैः पूर्णैः खण्डवेष्टैर्युधिष्ठिर!।” तत्र विहितनिषेधकालादि राजमार्त्तण्डे उक्तं यथा “पतङ्गे मकरे जाते देवे जाग्रति माधवे। बुधाष्टमीं प्रकुर्वीत वर्जयित्वा तु चैत्रकम्। प्रसुप्ते च जगन्नाथे सन्ध्याकाले मधौ तथा। बुधाष्टमीं न कुर्वीत कृता हन्ति पुराकृतमिति”। एतद्व्रतमारम्भमपि चैत्रादौ न कर्त्तव्यं यथाह स्मृतिः “मीने धनुषि देवेशे सुप्तेऽशुद्धदिने तथा। बुधाष्टमीं न कुर्वीत पूर्वविद्धामपि क्वचित्” अशुद्धदिने मलमासाशुद्धियुक्तदिने।

**बुधित** त्रि० भ्वा०बुध—क्त इट्। ज्ञाते अमरः।

**बुधिल** त्रि० बुध—किलच्। विदुषि उणादि०।

**बुध्न** पु० बन्ध—नक् बुधादेशः। १मूले अमरः २शिवे भरतः ३अन्तरीक्षे ऋ० ४।१९।४ भाष्यम्। “पृथुबुध्नोदराकृतिः” वेदान्तप०। “अग्नेर्गर्भिद्रवमस जन्तु बुध्नः” शा०भा० धृता श्रुतिः। निरुक्ते तु बद्धा अस्मिन् धृता आप इति अन्तरिक्षं बुध्नम्” तस्य निरुक्तिरुक्ता।

**बुध्न्य** पु० बुध्ने मूले भवः यत्। १गार्हपत्ये अग्नौ “अहिरसि बुध्न्यः” ताण्ड्यब्रा०१।४।११ “अहिरसि हन्ता रक्षःप्रभृतीनां बुध्न्यः बुध्ने मूले आदौ आधानकाले प्रथमं जातोऽसि” २अन्तरिक्षभवे ३रुद्रभेदे च। “बुध्ने निवसति बुध्न्यः योऽहिः सः अग्निः बुध्न्यः बुध्नमन्तरीक्षं अन्तरिक्षे च तन्निवासाद्वा” निरु०। “मानोऽहिर्बुध्न्योरिषे” तद्धृता श्रुतिः।

**बुन्द** निशामने—भ्वा० उभ० सक० सेट्। बुन्दति ते इरित् अबुदत् अबुन्दीत्। अबुन्दिष्ट। उदित् क्त्वा वेट्। निशामनमालोचनम् प्रणिधानमिति यावत्।

**बुन्ध** निशामने भ्वा० उभ० सक० सेट्। बुन्धति ते इरित् अबुधत्—अबुन्धीत् अबुन्धिष्ट। निशामनमालोचनम्। उदित् क्त्वा वेट्।

**बुन्ध** बन्धे चु०उभ०सक० सेट्। बुन्धयति ते अबुबुन्धत् त।

**बुबुर** न० उदके निघण्टौ बर्बुरमित्यत्र पाठान्तरम्।

**बुभुक्षा** स्त्री० भुज—सन्—भावे अ। भोजनेच्छायां क्षुधायाम्। सा च प्राणधर्मः यथोक्तं शा०ति० “बुभुक्षा च पिपासा च प्राणस्य” ऊर्मिशब्दे दृश्यम्। अन्नेऽजीर्णे च सा न भवति अथ भवति चेत् अनिष्टदा यथोक्तं सुश्रुते “उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य” “रसं यदा दोषविदग्धमामं लीनं न तेजः पथमाप्नोति। भवत्यजीर्णेऽपि तदा बुभुक्षा सा मन्दबुद्धिं विषवन्निहन्ति”। कृशादि०शीलार्थे अण्। बौभुक्ष तच्छीले त्रि०

**बुभुक्षित** त्रि० बुभुक्षा+तार० इतच्। क्षुधायुक्ते “बुभुक्षितः किं द्विकरेण भुङ्क्ते” इत्युद्भटः।

**बुल** मज्जने चु० उभ० अक० सेट्। बोलयति ते अबूबुलत्। बोलयति स्वरः पयसि मज्जतीत्यर्थः।

**बुलि** स्त्री तुदा० बुड—इन् किच्च डस्य लः। भये हेमच०।

**बुल्व** त्रि० बुल्—व उलश० नि०। तिरश्चीने शत०ब्रा० ११।५।४।१४।

**बुष(स)** न० बुस्यते उत्सृज्यते बुस—उत्सर्गे क पृषो० वा षत्वम्। (आगड़ा) १तुच्छधान्ये फलरहितधान्ये अमरः। अयं षोपधः २उदके वेदनिघण्टुः ततः तृणा० चतुरर्थ्यां स। बुसस तत्सन्निपादौ त्रि०। पृषो० दीर्घः। बूसमप्यत्र। [अबोसीत् बुबोस

**बुस** उत्सर्गे दि०पर०सक०सेट्। बुस्यति। इरित् अबुसत्

**बुस्त** आदरे अनादरे च चु०उभ०सक०सेट्। बुस्तयति ते अबुबुस्तत् त।

**बुस्त** न० बुस्त्यते नाद्रियते आद्रियते वा बुस्त—घञ्। १पनसादिफलस्य त्याज्ये अंशे (भुषि) २मांसपिष्टकभेदे च अमरभरतौ।

**बूक्क** न० बुक्क+पृषो० दीर्घः। बुक्कशब्दार्थे रमानाथः।

**बृबदुक्थ** न० पदे निघण्टुः।